# षष्ठ: पाठ : सन्धि:

**अधोलिखितात् अनुच्छेदात् दीर्घ-गुण-यण् वृद्धि-सन्धीनाम् उदाहरणानि चित्वा लिखत-**

जानामि+अहम् **जानाम्यहम्** यत् जलोपप्लवेन **जल+उपप्लवेन** पीडितः रमा+ईशः **रमेशः** वृक्षारूढः **वृक्ष+आरूढः** अभवत्। लीलया+एव **लीलयैव** सर्वमसहत। तदा सः साधु+उपदेशम् **साधूपदेशं** स्मृतवान् यत् कदापि धैर्यं न त्याज्यम्। स्थितेः सामान्ये जाते सः महा+औत्सुक्येन **महौत्सुक्येन** गृहं गतवान् अचिन्तयत् च सर्वं खल्विदम् **खलु+इदम्** ब्रह्म। तदा मोहनः सोहनः च द्वौ+अपि **द्वावपि** रमेशस्य गृहमागच्छतः। सर्वेऽपि **सर्वे+अपि** एकत्रीभूय भोजनं पचन्ति। (सर्वे छात्राः एकैकं कृत्वा सर्वेषाम् उदाहरणानाम् समाधानं कुर्वन्ति तदा एकः छात्रः वदति।)

| | | |
|---|---|---|
| आदित्यः | = | गुरुवर ! अन्तिमौ द्वौ तु स्पष्टौ न भवतः। |
| शिक्षकः | = | अस्तु, अवबोधयामि एकैकं कृत्वा। |
| यथा | = | द्वौ + अपि - द्वावपि गृहमागच्छतः। |

**एवमेव**

| | | |
|---|---|---|
| (i) द्वौ+एते | = | **द्वावेतौ** पठतः। |
| (ii) तौ+अत्र | = | **तावत्र** लिखतः। |
| (iii) पो+अनम् | = | पवनम् मन्दं-मन्दं वहति। |
| (iv) पौ+अकः | = | **पावकः** सर्वं दहति। |
| (v) भावुकः | = | **भौ+उकः** न भवितव्यः। |
| (vi) ने+अनम् | = | नयनम् उद्धाट्य एव मार्गे चलत। |
| (vii) शे+अनम् | = | **शयनम्** रात्रौ एव करणीयम्। |
| (viii) **चे+अनम्** | = | **चयनम्** कृत्वा एव खाद्याखाद्यं खादनीयम्। |
| (ix) गै+अक: | = | **गायकः** मधुरं गायति। |
| (x) नै+अक: | = | **नायकः** सुन्दरं नृत्यति। |
| (xi) शायिकाः | = | **शै+इकाः** रेलयानेषु भवन्ति। |

**'एचोऽयवायावः' इति नियमानुसारं ए, ऐ, ओ, औ- इत्येतेषां स्वराणां परतः कस्मिंश्चिदपि स्वरे आगते एतेषां चतुर्णां स्थाने क्रमशः अय्, आय्, अव्, आव् च भवन्ति। एते 'अयादिचतुष्टय' इति नाम्नाऽपि ज्ञायन्ते।**

| | | |
|---|---|---|
| छात्रा: | = | अवगतः अस्माभिः अयादिसन्धिः। |

www.ncertsolutionhub.in

शिक्षकः = पठिते अनुच्छेदे अन्तिमं वाक्यमासीत् - सर्वेऽपि (सर्वे+अपि) एकत्रीभूय भोजनं पचन्ति। एतत् पूर्वरूपसन्धेः उदाहरणम् अस्ति।

**एवमेव अन्यानि उदाहरणानि पश्यन्तु-**

(i) अन्येऽपि = **अन्ये+अपि** जनाः भोजनं खादन्ति।

(ii) सर्वेऽत्र = **सर्वे+अत्र** उपविशन्ति।

(iii) विष्णोऽवतु = विष्णो+अवतु माम्।

(iv) शिशोऽपि = **शिशो+अपि** कुशली त्वम्।

(v) साधोऽत्र = **साधो+अत्र** भोजनं कुरु।

**'एङः पदान्तादति', इति सूत्रानुसारं पदान्तयोः ए, ओ इत्येतयोः परतः यदि अकारः आगच्छेत् तर्हि द्वयोः स्थाने पूर्वरूपः अर्थात् 'ए, ओ' एव भवति। अकारश्च ऽ इति अवग्रहस्य चिह्नेन दर्श्यते। एषः भेदः 'पूर्वरूपसन्धिः' इति कथ्यते।**

छात्रा: शिक्षकः = पूर्वरूपसन्धिरपि स्पष्टः। किं कोऽप्यन्यः भेदः भवति स्वरसन्धेः।
शिक्षकः = आम्, प्रकृतिभावः पररूपश्च एतौ द्वौ अन्यौ भेदौ अपि स्तः। परं दशमकक्षायां केवलं षड्भेदाः। अधुना एतेषां पुनरभ्यासम् कुर्मः येन स्वरसन्धिः पूर्णतया हृदयंगमः भवेत्।

## अभ्यास

1. अधः प्रदत्तवाक्येषु सन्धिम्/सन्धिविच्छेदं वा कृत्वा लिखत-

(i) वानराः सर्वत्र वृक्षे + अपि **वृक्षेऽपि** कूर्दन्ति।
(ii) के + अत्र **केऽत्र** विद्यालयम् आगत्य कक्षां न आगताः।
(iii) हे शिशोऽत्र **शिशो+अत्र** आगत्य उपविश|
(iv) ते यठन्ति, तावपि **तौ+अपि** पठतः।
(v) यथा+उचितं **यथोचितं** कार्यं करणीयम्।
(vi) एतत् पुस्तकं तु तवैवास्ति **तव+एव+अस्ति।**
(vii) साधूपरि **साधु+उपरि** गच्छतः।
(viii) कवि+इन्द्रः **कवीन्द्रः** नवीनां कवितां श्रावयति।
(ix) कस्मिन्नपि अत्याचारः **अति+आचारः** तु न करणीयः।
(x) भानो + ए **भानवे** जलार्पणं करणीयम्।

शिक्षकः = छात्राः! ह्यः अस्माभिः स्वरसन्धिः सम्यगयगतः। अद्य व्यञ्जनसन्धिं विसर्गसन्धिं चावबोधयामि।
छात्राः = (समवेतस्वरेण) आम् श्रीमन्! वयमपि सन्धेः अन्यान् भेदान् अवगन्तुम् इच्छामः|
(अध्यापकः श्यामपट्टसहायतया पाठयति।)
(छात्राश्च स्वपुस्तिकासु लिखन्ति।)

www.ncertsolutionhub.in

## व्यञ्जन-सन्धिः

**1. उदाहरणमनुसृत्य सन्धिं सन्धिविच्छेदं वा कुरुत-**

(क) चलत्+अनिशम् = चलदनिशम् एव उन्नतिं करोति।

(i) एतस्मादेव = **एतस्मात्+एव** पाठात् त्वं पठ।

(ii) जगत्+ईशः = **जगदीशः** सर्वत्र विद्यमानः।

(iii) यस्य शब्दस्य अन्ते स्वरः सः शब्दः अजन्तः = **अच्+अन्तः** कथ्यते।

(iv) शब्दरूपः सुप्+अन्तः = **सुबन्तः** कथ्यते, धातुरूपश्च तिङन्तः।

वर्गस्य प्रथमः वर्णः + वर्गस्य तृतीयः, चतुर्थः वर्णः, स्वरः, य्, र्, ल्, व् वर्णाः
↓
प्रथमवर्णस्य स्थाने तृतीयः वर्णः (परिवर्तनम्)

**(ख) अस्मात् + नगरात् अस्मान्नगरात् ग्रामः अतिदूरम्।**

(i) सम्यक्+नेता = **सम्यङ्नेता** एव राष्ट्रोन्नत्यै प्रयतते।
(ii) किन्नु = **किम्+नु** खल्विदं लिखितम्।
(iii) सः प्रत्यक्+आत्मा = **प्रत्यगात्मा** भूत्वा परोपकारं करोति।
(iv) दिङ्नागः = **दिक्+नागः** 'कुन्दमाला' इत्यस्य लेखकः।
(v) वर्षस्य षण्मासाः = **षट्/षड्+मासाः** व्यतीताः।

**(ग) सः कदाचित् ध्यानेन श्रृणोति कदाचित्+च = कदाचितच्च न।**

(i) शरत्+चन्द्रः = **शरच्चन्द्रः** मम मित्रस्य नाम।
(ii) मनुष्यः ज्ञानेन सफलं कुर्याज्जीवितम् = **कुर्यात्+जीवितम्।**
(iii) मनस्+चञ्चलम् = **मनः चञ्चलं** हि भवति।
(iv) हरिश्शेते = **हरिः+शेते** वैकुण्ठे।

स्, तवर्ग + श्, चवर्ग
↓ ↓
श्, चवर्ग (परिवर्तनम्)

**(घ) धनुस्+टङ्कारः = धनुष्टङ्कारः तु युद्धस्य संकेतः।**

(i) प्रथमपंक्त्याः बालस्+षष्ठः = **बालषष्ठः** पाठं पठेत्|
(ii) रामायणं वाल्मीकिना लिखितम्, तट्टीका = **तत्+टीका** च केन लिखिता?
(iii) मह्यम् पक्षिणाम् उत्+डयनम् = **उड्डयनम्** अतीव रोचते।
(iv) टीकां तु लेखकष्टीकते। = **लेखकस्+टीकते।**

www.ncertsolutionhub.in

स्, तवर्ग + ष, टवर्ग
↓ ↓
ष, टवर्ग (परिवर्तनम्)

**(ङ) अतिथेः सद्+कारः = सत्कारः करणीयः।**

(i) परिश्रमी छात्रः एव परीक्षायां सफलतां लभ्+स्यते = **लप्स्यते।**
(ii) दिक्पालः = **दिग्ग्+पालः** कः भवति?

वर्गस्य द्वितीयः तृतीयः चतुर्थः वर्णः+वर्गस्य प्रथमः, द्वितीयः वर्णः, श, ष, स्
↓
स्ववर्गस्य तृतीयः वर्णः भवति।(परिवर्तनम्)

**(च) अ. हरिम्+वन्दे - हरिं वन्दे जगद्गुरुम्।**

(i) अहम+पुनः = **अहं पुनः** पाठं पठिष्यामि ।
(ii) अपूर्वं खलु = **अपूर्यम्+खलु** आसीत् नाटके नायकस्य अभिनयम्।
(iii) त्वं माम् = **त्वम्+माम्** आकारयसि किम्?
(iv) श्रेष्ठम्+कर्ष = **श्रेष्ठं कर्म** एव कर्तव्यम्।

पदान्त म्+व्यञ्जनवर्णः
↓
अनुस्वारः ( ं) (परिवर्तनम्)

**(च) आ. अति सम्+चयः = सञ्चयः न कर्तव्यः।**
(i) शीतकाले शैत्यं कम्पनम्+च = **कम्पनञ्च** अप्यनुभूयते।
(ii) शीतकाले रात्रौ सञ्चरणम् = **सम्+चरणम्** दुष्करम्।
(iii) भुजनगरम्+तु = **नगरन्तु** गुजरातराज्ये अस्ति।
(iv) त्वं किमर्थं कुम्+ठितः = **कुण्ठितः** असि?

म्/ अनुस्वारः + वर्गीय व्यञ्जनम्
↓
परवर्ती-वर्गस्य पञ्चमः-(परिवर्तनम्)

## विसर्ग-सन्धिः

1. उदाहरणमनुसृत्य सन्धिं सन्धिविच्छेदं वा कुरुत-

**(क) हे मित्र! नमः+ते = नमस्ते।**

(i) शत्रोः अपि शिरः+छेदः = **शिरश्छेदः** न करणीयः।
(ii) कठिना परिस्थितिः दारुणः+च = **दारुणश्च** कालः।
(iii) तुरङ्ः + तुरङ्गैः = **तुरङ्गास्तुरंगेः** सह धावन्ति।
(iv) धनुष्टङ्कारः = **धनुस्+टङ्कारः** श्रूयते।
(v) सः कठिनं तपस्तेपे = **तपः+तेपे।**

www.ncertsolutionhub.in

विसर्ग (:) + श्, च् छ्
↓
श् (परिवर्तनम्)
विसर्ग + स्, त्, थ,
↓
स्. (परिवर्तनम्)
विसर्ग ष, ट्, ठ
↓
ष (परिवर्तनम्)

(ख) रामः वनमगच्छत् लक्ष्मणः+अपि = **लक्ष्मणोऽपि** तेन सह अगच्छत्।

(i) निर्धन: + जनः = **निर्धनो** जनः धनाभावे सदा दुःखितः भवति।
(ii) चौरः + अयम् = **चौरोऽयम्** मम स्यूतं चोरितवान्।
(iii) एकस्मिन् वने व्याघ्रः + नष्टः **व्याघ्रो नष्टः** अभवत्।
(iv) पण्डितो जनः **पण्डितः+जनः** विद्वान् भवति।
(v) सः पठति ततोऽसौ = **ततः + असौ** लिखति|
(vi) तस्य मनोरथः = **मनस्+रथः** सिध्यति।

**(ग) वने वह्निः+दह्यते = वह्निर्दह्यते पादपान्।**

विसर्ग (:) + अ
↓
उ (गुण ओ) + ऽ (अवग्रहः)
विसर्ग (:) + वर्गस्य तृतीयः, चतुर्भः वर्णः, य, र्, ल, व्, ह् उ (गुण ओ)

(i) वसन्ते प्रकृतिः+एव = **प्रकृतिरेव** मनोहारिणी।
(ii) कन्या पितुः गृहम् = **पितुर्गृहम्** त्यक्त्वा पतिगृहं गच्छति।
(iii) नाविकः = **नौ+इकः** नौकां चालयति।
(iv) नाटककारः कविरपि = **कविः+अपि** च काव्यं कुरुतः।
(v) अहं पदातिरेव = **पदातिः+एव** विद्यालयम् आगच्छामि।

अ, आ भिन्नस्वरात् परः विसर्गः+स्वरः, वर्गस्य तृतीयः, चतुर्थः पञ्चमो वा वर्णः स्यात्।
↓
इ (परिवर्तनम्)

(घ) ध्यानेन न पठसि अतः+एव = **अत एव** उत्तमाङ्कान् न प्राप्नोषि।

(i) आकाशे = **आकाश+इ** कपोता उत्पतन्ति।
(ii) अर्जुनः+उवाच = **अर्जुन उवाच** अहं युद्धं न करिष्यामि।
(iii) विद्यालयं बालका आगच्छन्ति = **बालकाः+आगच्छन्ति** पठन्ति च।
(iv) बसयानेन स गच्छति = **सः+गच्छति** विद्यालयम्।
(v) एषः+आगच्छति = **एव आगच्छति** कार्यं करोति पठति च।

www.ncertsolutionhub.in

## अनुनासिकसन्धिः

1. अधोलिखितानि वाक्यानि ध्यानेन पठत-

(क) **एतन्न** शोभनीयम्।
(i) **तन्न** उचितम्।
(ii) **वाङ्मयं** तपः।
(iii) **तन्मयो** भूत्वा कार्य शुरु।
(iv) **एतन्नुरारिः** अस्ति।
(v) **तन्नाम** किमस्ति।

**उपरि लिखितानि सर्वाणि उदाहरणानि अनुनासिकसन्धेः सन्ति।**

अनुनासिकसन्धी पूर्वपदस्य अन्तिमः वर्णः यदि वर्गस्य कोऽपि वर्णः भवति, उत्तरपदस्य प्रथमः वर्णः यदि अनुनासिकवर्णः भवति तदा पूर्वपदस्य अन्तिमवर्णः स्ववर्गस्य पञ्चमवर्णे परिवर्तितः भवति।
यथा-
तन्नाम - तत् (त्) + नाम
वर्गस्य प्रथमः वर्णः + वर्णस्य अन्तिमः वर्णः
तदा तु वर्णः स्ववर्गस्य अन्तिमे 'न्' इति वर्णे परिवर्तितः भवति।
एते सर्वे वर्णाः अनुनासिकवर्णाः सन्ति।
यथा- ङ्, ञ्, ण्, न्, म्

## अभ्यासः

1. अधोलिखितानां सन्धिं सन्धिविच्छेदं वा कुरुत-

| | | |
|---|---|---|
| (i) हे ईश्वर! **सन्मतिं** यच्छ। | = | सत् + मतिम् |
| (ii) हे छात्रा! **सत्** + **मार्गे** चलता। | = | सन्मार्गे |
| (iii) प्रलयकाले सर्वत्र **अम्मयं** भवति। | = | अप + मयम् |
| (iv) **जगन्नाथः** सर्वान् रक्षति। | = | जगत् + नाथः |
| (v) **तन्मात्रम्** एव खाद। | = | तत् + मात्रम् |
| (vi) कक्षायां **षट् + नवतिः** छात्राः सन्ति। | = | षण्णवतिः |
| (vii) सा **जगत् + माता** इति रूपेण प्रसिद्धा अस्ति। | = | जगन्माता |
| (viii) मम **सन्मुखे** तिष्ठा। | = | सत् + मुखे |
| (ix) **दिक् + नागः** सर्वान् रक्षति। | = | दिङ्नागः |

## तुक् आगम- सन्धिः

2. अधोलिखितानि वाक्यानि पठत-
(i) ग्रीष्मे जनाः **वृक्षच्छायां** सेवन्ते।
(ii) हे छात्राः ! एकम् **अनुच्छेदं** लिखत।
(iii) पुरा भारते **एकच्छत्रं** राज्यम् आसीत्।
(iv) आकाशः मेघैः **आच्छन्नः** अस्ति।

www.ncertsolutionhub.in

(v) सम्बन्ध-**विच्छेदः** न करणीयः।

- उपरि यानि रेखाङ्कितपदानि सन्ति तानि सर्वाणि 'तुक्' आगम-सन्धेः उदाहरणानि सन्ति।
- तुक्-आगमः - सन्धौ यदि पूर्वपदे 'अ, इ, उ, ऋ स्वराः भवन्ति उत्तरपदे च 'छ' भवति तदा उभयोः पदयोः मध्ये 'चू' वर्णः आगच्छति।
- परं यदि पूर्वपदे आ, ई ऊ स्वराः भवन्ति तदा 'च' वर्णस्य आगमः विकल्पेन भवति।
- यथा - लक्ष्मी-छाया = लक्ष्मी छाया/लक्ष्मीच्छाया

**3. अधोलिखितानां सन्धिं सन्धिविच्छेदं वा कुरुत-**

| | | |
|---|---|---|
| (i) शोधच्छात्राः | = | **शोध + छात्रा** |
| (ii) विच्छेदः | = | **वि + छेदः** |
| (iii) अनु + छेदः | = | **अनुच्छेद** |
| (iv) परि + छेदः | = | **परिच्छेद** |
| (v) लक्ष्मीच्छाया | = | **लक्ष्मी + छाया** |
| (vi) वृक्ष + छाया | = | **वृक्षच्छाया** |
| (vii) तव + छविः | = | **तवच्छविः** |
| (viii) वृक्षच्छेदनम् | = | **वृक्ष + छेदनम्** |
| (ix) छुरिका + छिन्नः | = | **छुरिकाच्छिन्नः** |
| (x) शब्दच्छेदः | = | शब्द + छेवः |

www.ncertsolutionhub.in